# अथ धर्मव्याधगीता ॥

व्याध उवाच–विज्ञानार्थं मनुष्याणां मनः पूर्वं प्रवर्तते॥
तत्प्राप्य कामं भजते क्रोधं च द्विजसत्तम ॥ १ ॥
ततस्तदर्थं यतते कर्म चारभते महत् ॥
इष्टानां रूपगन्धानामभ्यासं च निषेवते ॥ २ ॥
ततो रागः प्रभवति द्वेषश्च तदनन्तरम् ॥
ततो लोभः प्रभवति मोहश्च तदनन्तरम् ॥ ३ ॥
ततो लोभाभिभूतस्य रागद्वेषहतस्य च ॥
न धर्मे जायते बुद्धिर्व्याजाद्धर्मं करोति च ॥ ४ ॥
व्याजेन चरते धर्ममर्थं व्याजेन रोचते ॥
व्याजेन सिध्यमानेषु धनेषु द्विजसत्तम ॥ ५ ॥
तत्रैव रमते बुद्धिस्ततः पापं चिकीर्षति ॥
सुहृद्भिर्वार्यमाणश्च पंडितैश्च द्विजोत्तम ॥ ६ ॥
उत्तरं श्रुतिसंबद्धं ब्रवीत्यश्रुतियोजितम् ॥
अधर्मस्त्रिविधस्तस्य वर्तते रागदोषजः ॥ ७ ॥
पापं चिंतयते चैव ब्रवीति च करोति च ॥
तस्याधर्मप्रवृत्तस्य गुणा नश्यन्ति साधवः ॥ ८ ॥

एकाशीलैश्च मित्रत्वं भजंते पापकर्म्मिणः ॥
सतेन दुःखमाप्नोति परत्र च विपद्यते ॥ ९ ॥
पापात्मा भवति ह्येवं धर्मलाभं तु मे शृणु ॥
यस्त्वेतान्प्रज्ञया दोषान्पूर्वमेवानुपश्यति ॥ १० ॥
कुशलः सुखदुःखेषु साधूंश्चाप्युपसेवते ॥
तस्य साधुसमारंभाद्बुद्धिर्धर्मेषु राजते ॥ ११ ॥
इदं विश्वं जगत्सर्वमजय्यं चापि नित्यशः ॥
महाभूतात्मकं ब्रह्म नातः परतरं भवेत् ॥ १२ ॥
ब्राह्मण उवाच—सत्वस्य रजसश्चैव तमसश्च यथात-
थम् ॥ गुणांस्तत्त्वेन मे ब्रूहि यथावदिह पृच्छतः ॥
॥ १३॥ व्याध उवाच—हंत ते कथयिष्यामि यन्मां
त्वं परिपृच्छसि ॥ एषांगुणान् पृथक्त्वेन निबोध
गदतो मम॥ १४॥मोहात्मकं तमस्तेषां रज एषां प्रव-
र्तकम् ॥ प्रकाशबहुलत्वाच्च सत्वं ज्याय इहोच्यते
॥ १५ ॥ अविद्याबहुलो मूढः स्वप्नशीलो विचे-
तनः॥ दुर्हृषीकस्ततोध्यस्तः सक्रोधस्तामसोऽलसः ॥

प्रवृत्तवाक्यो मंत्री च यो नराग्र्योऽनसूयकः ॥
विधित्समानो विप्रर्षे स्तब्धो मानी स राजसः॥ १७ ॥
प्रकाशबहुलो धीरो निर्विधित्सोऽनसूयकः ॥
अक्रोधनो नरो धीमान् दांतश्चैव स सात्विकः ॥ १८ ॥
इति धर्मव्याधगीता समाप्ता ॥ ८ ॥